श्री काळिका स्वरूप स्तुतिः

श्री काळिका स्वरूप स्तुतिः

सिततरसंविदवाप्यं सदसत्कलनाविहीनमनुपाधि |
जयति जगत्त्रयरूपं नीरूपं देवि ते रूपं || 1 ||

एकमनेकाकारं प्रसृतजगद्व्याप्तिविकृतिपरिहीनं |
जयति तवाद्वयरूपं विमलमलं चित्स्वरूपाख्यं || 2 ||

जयति तवोच्छलदंतः स्वच्छेच्छायाः स्वविग्रहग्रहणं |
किमपि निरुत्तरसहजस्वरूपसंवित्प्रकाशमयं || 3 ||

वांत्वा समस्तकालं भूत्या झंकारघोरमूर्तिमपि |
निग्रहमस्मिन् कृत्वानुग्रहमपि कुर्वती जयसि || 4 ||

कालस्य कालि देहं विभज्य मुनिपंचसंख्यया भिन्नं |
स्वस्मिन् विराजमानं तद्रूपं कुर्वती जयसि || 5 ||

भैरवरूपी कालः सृजति जगत्कारणादिकीटांतं |
इच्छावशेन यस्याः सा त्वं भुवनांबिका जयसि || 6 ||

जयति शशांकदिवाकरपावकधामत्रयांतरव्यापि |
जननि तव किमपि विमलं स्वरूपरूपं परंधाम || 7 ||

एकं स्वरूपरूपं प्रसरस्थितिविलयभेदस्त्रिविधं |
प्रत्येकमुदयसंस्थितिलयविश्रमतश्चतुर्विधं तदपि || 8 ||

इति वसुपंचकसंख्यं विधाय सहजस्वरूपमात्मीयं |
विश्वविवर्तावर्तप्रवर्तक जयति ते रूपं || 9 ||

सदसद्विभेदसूतेर्दलनपरा कापि सहजसंवित्तिः |
उदिता त्वमेव भगवति जयसि जयाद्येन रूपेण || 10 ||

जयति समस्तचराचरविचित्रविश्वप्रपंचरचनोर्मि |
अमलस्वभावजलधौ शांतं कांतं च ते रूपं || 11 ||

सहजोल्लासविकासप्रपूरिताशेषविश्वविभवैषा |
पूर्णा तवांब मूर्तिर्जयति परानंदसंपूर्णा || 12 ||

कवलितसकलजगत्रयविकटमहाकालकवलनोद्युक्ता |
उपभुक्तभावविभवप्रभवापि कृशोदरी जयसि || 13 ||

रूपत्रयपरिवर्जितमसमं रूपत्रयांतरव्यापि |
अनुभवरूपमरूपं जयति परं किमपि ते रूपं || 14 ||

अव्ययमकुलममेयं विगलितसदसद्विवेककल्लोलं |
जयति प्रकाशविभवस्फीतं काल्याः परं धाम || 15 ||

ऋतुमुनिसंख्यं रूपं विभज्य पंचप्रकारमेकैकं |
दिव्यौघमुद्विरंती जयति जगत्तारिणी जननी || 16 ||

भूदिग्गोखगदेवीचक्रसंज्ञानविभवपरिपूर्णं |
निरुपमविश्रांतिमयं श्रीपीठं जयति ते रूपं || 17 ||

प्रलयलयांतरभूमौ विलसितसदसत्प्रपंचपरिहीनां |
देवि निरुत्तरतरां नौमि सदा सर्वतः प्रकटां || 18 ||

यादृङ्महाश्मशाने दृष्टं देव्याः स्वरूपमकुलस्थं |
तादृग् जगत्रयमिदं भवतु तवांब प्रसादेन || 19 ||

इत्थं स्वरूपस्तुतिरभ्यधायि
सम्यक्समावेशदशावशेन |
मया शिवेनास्तु शिवाय सम्यक्
ममैव विश्वस्य तु मंगळाय || 20 ||

इति श्रीश्रीज्ञाननेत्रपाद रचितं श्री काळिका स्वरूप स्तुतिः |